**इयम् आकाशवाणी**

**सम्प्रति वार्ता: श्रूयन्ताम्**

**दिनाङ्क :- 23.09.2024 सायम् - 06:20**

**आदौ-मुख्यवार्ता:**

- प्रधानमन्त्री नरेन्द्रमोदी अद्य रात्रौ न्यूयॉर्के संयुक्त-राष्ट्र-महासभायां ‘'समिट ऑफ द फ्यूचर " इति भविष्यते सम्मेलनं इति कार्यक्रमं सम्बोधयिष्यति।
- दशमं राष्ट्रमण्डल-संसदीय-संघ-भारत-क्षेत्र-सम्मेलनम् अद्य नव-दिल्ल्यां समारब्धम्।
- सर्वोच्चन्यायालयेन प्रोक्तं यत् व्यक्तिगतरूपेण बालैः सम्पृक्तानाम् अभद्रचलच्चित्राणां दर्शनम् पॉक्सो-अधिनियमस्य उल्लंघनम् अस्ति ।
- नेशनल-पीपुल्स-पावर इति दलस्य प्रमुखः अनुरा-कुमार-दिसानायके अद्य श्रीलङ्कादेशस्य नवमः कार्यकारि-राष्ट्रपतिरूपेण शपथवचनं स्वीकृतवान्।
- प्रातरद्य लेबनाने जातेषु इजरायलदेशस्य प्रहारेषु न्यूनातिन्यूनं शतं जनाः मारिताः चतुश्शततः अधिकाः जनाः व्रणिताश्च।

**प्रधानमन्त्री-अमेरिकायात्रा**

प्रधानमन्त्री नरेन्द्रमोदी अद्य रात्रौ न्यूयॉर्के संयुक्त-राष्ट्र-महासभायां ‘'समिट ऑफ द फ्यूचर " इति कार्यक्रमं सम्बोधयिष्यति। शिखर-सम्मेलनस्य विषयः अस्ति 'उत्तमभविष्याय बहुपक्षीयं समाधानम्' इति। शिखरसम्मेलनम् अतिरिच्य , प्रधानमन्त्री अनेकैः विश्वनेतृभिः सह द्विपाक्षिकवार्ताम् करिष्यति, अपि च परस्पर-हिताधारितेषु विषयेषु चर्चां करिष्यति। श्वः, स्वयात्रायाः द्वितीये दिने, प्रधानमन्त्री मैसाचु-सेट्स्-प्रौद्योगिकी-संस्थानेन आयोजिते वर्तुलोत्पीठिकाख्ये सम्मेलने प्रौद्योगिकोद्योगस्य नेतृभिः सह वार्तालापम् अकरोत्। उद्योगप्रमुखान् सम्बोधयन् श्री मोदिवर्यः अवदत् यत्, एकविंशतितमः शताब्दः तन्त्रज्ञान-चालितः अस्ति, अपि च मानव-कल्याणार्थं तन्त्रज्ञानस्य लोकतान्त्रिकमूल्यैः सह सामञ्जस्यं आवश्यकम् अस्ति। प्रधानमन्त्री मोदी अवदत् यत् सः तान् सर्वदा सशक्तभारतस्य विकासयात्रायां सहयात्रिकरूपेण सह-सहभागि-रूपेण च पश्यति। सः दृढविश्वासं प्रकटितवान् यत् मिलित्वा भारत-अमेरिका-देशयोः प्रौद्योगिकी-संस्थाः वैश्विकसमस्याः दूरीकर्तुं महत्त्वपूर्णां भूमिकां निर्वहन्ति। सी. ई. ओ. एस्. इत्यनेन, भारतेन सह

निवेशाय सहयोगाय च प्रबलरुचिः प्रकटिता । अवधेयं यत् प्रधानमन्त्रिणा गतरात्रौ न्यूयार्क्-नगरे भारतीयसमुदायस्य विशालजनसम्मर्दः अपि सम्बोधितः। एतदतिरिच्य, श्रीमोदी नेपालस्य प्रधानमन्त्रिणा, कुवैत-देशस्य युवराज्ञा, फिलिस्तीन-देशस्य राष्ट्रपतिना च सह द्विपाक्षिकं सम्वादम् अकरोत्।

**राष्ट्रमण्डल-संसदीय-संघ-भारत-क्षेत्र-सम्मेलनम्**

द्वि-दिवसीयं दशमं राष्ट्रमण्डल-संसदीय-संघ-भारत-क्षेत्र-सम्मेलनम् अद्य नव-दिल्ल्यां समारब्धम् । सम्मेलनस्य विषयः अस्ति- "सतत-समावेशि-विकास-प्राप्तौ विधायि-निकायानां भूमिका" इति ।

**सर्वोच्चन्यायालयः-पॉक्सो-अधिनियमः**

सर्वोच्चन्यायालयेन प्रोक्तं यत् व्यक्तिगतरूपेण बालैः सम्पृक्तानाम् अभद्रचलच्चित्राणां दर्शनम् पॉक्सो-अधिनियमस्य उल्लंघनम् अस्ति अपि च तेन देशस्य सर्वे न्यायालयाः आदिष्टाः सन्ति यत् ते कस्मिन्नपि न्यायाकादेशे निर्णये च बाल-पोर्नोग्राफी इत्यस्य शब्दस्य प्रयोगं न कुर्युः । शीर्षन्यायालयेन अद्य मद्रास-उच्च-न्यायालयस्य तम् आदेशं विरुध्य एषः निर्देशः प्रख्यापितः अस्ति यस्मिन् प्रोक्तमासीत् यत् बालैः सम्पृक्तानां वयस्क-चलच्चित्राणां दर्शनं पॉक्सो-अधिनियमस्य अन्तर्गतं न ग्रहीष्यते ।

**श्रीलङ्का-राष्ट्रपतिनिर्वाचनम्**

नेशनल-पीपुल्स-पावर इति दलस्य प्रमुखः अनुरा-कुमार-दिसानायके अद्य श्रीलङ्कादेशस्य नवमः कार्यकारि-राष्ट्रपतिरूपेण शपथवचनं स्वीकृतवान्। अद्य प्रातः राष्ट्रपति-सचिवालये शपथग्रहण-समारोहः अभवत्। विपक्षस्य नेता सजिथ-प्रेमदासा इत्येतं विरुद्ध्य विहितस्य निर्वाचनस्य अनन्तरं पञ्चाशद्वर्षीयेन श्री-दिसानायके-वर्येण विजयः समधिगतः। निर्वाचनं, अस्य अभूतपूर्वनिर्वाचनस्य मतगणनायाः अनन्तरं निवर्तमानराष्ट्रपतिः रानिल्-विक्रमसिंघे-वर्यः पराजितो भूत्वा अपदस्थः अभवत् । प्रधानमन्त्रिणा नरेंद्रमोदिना श्रीलंकायाः राष्ट्रपतिनिर्वाचने विजयाय अनुरा-दिसानायके-वर्यः वर्धापितः अस्ति ।

**संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रमः आकाशवाण्याः अन्तर्जालपट्टे www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय-तन्त्रांशे अपि उपलब्धो भविष्यति।**

**आयुष्मान-भारतम्-प्रधानमन्त्री**

आयुष्मान-भारत-प्रधानमंत्री-जन-आरोग्य-योजनायाः अद्य षड्वर्षाणि व्यतीतानि । अष्टादशोत्तर-द्विसहस्रतमाब्दे अस्मिन्नेव दिवसे प्रधानमन्त्रिणा नरेंद्रमोदिना झारखण्डस्य रांची-नगरे एषा योजना समारब्धा आसीत् । अस्याः योजनायाः उद्देश्यं सप्त-त्रिंशल्लक्षोत्तर-द्वादश-कोटि-परिवाराणां न्यूनातिन्यूनं पञ्चपञ्चाशत्-कोटि-लाभार्थिभ्यः प्रतिवर्षं पञ्चलक्षरूप्यकाणां स्वास्थ्यसुरक्षा-प्रदानम् अस्ति ।

**भूपेंद्र-यादवः-वृक्षारोपणम्**

केंद्रीय-पर्यावरण-वन-जलवायु-परिवर्तन-मंत्री भूपेंद्र-यादवः एकहोराभ्यन्तरं पञ्चलक्षतः अधिकानां वृक्षाणाम् आरोपणस्य विश्व-कीर्तिमत् प्राप्तुं प्रादेशिक-सेनायाः अष्टाविंशत्युत्तरैकशततमाय इन्फैंट्री-बटालियन इत्यस्मै, इकोलॉजिकल-टास्क-फोर्स इत्यस्मै च वर्धापनानि अयच्छत् । एकस्मिन् सामाज़िकसञ्चारपटले श्री-यादवः प्रोक्तवान् यत् सुरक्षाबलैः ह्यः जैसलमेरक्षेत्रे विशिष्ट-वृक्षारोपणाभियानान्तर्गतं न्यूनातिन्यूनं विंशतिसहस्राधिक-पञ्चलक्ष-वृक्षाः रोपिताः सन्ति । सः प्रोक्तवान् यत् प्रधानमंत्रिणः **एक पेड मां के नाम** इति अभियानस्य अन्तर्गतं अयम् उपक्रमः आयोजितः आसीत् यस्योद्देश्यं स्थानीयसमुदायानां मध्ये पर्यावरणजनजागरणस्य सम्वर्धनम् अस्ति।

**प्रशासनं-पलाण्डु :**

प्रशासनं पलाण्डुनाम् मूल्यं न्यूनिकर्तुं विपण्यां पलाण्डुनां विक्रयणम् करिष्यति | नव दिल्ल्याम् एकस्मिन् वार्ताहरसम्मेलने उपभोक्तृ विषयक विभागस्य सचिवा निधिखरे इत्येषा निगदितवती यत् बृहतमे संग्रहणे उचितमात्रायां प्लाण्डवः उपलब्धाः सन्ति | अनया भणितं यत् प्रशासनस्य पलाण्डुनां मूल्येषु दृष्टिरपि अस्ति |अपि च अस्मात् सप्ताहात् राज्यानां राजधानिषु प्रमुखेषु नगरेषु च समर्थन मूल्येषु पलाण्डुनां विक्र्यणम् भविष्यति इति ।

**आतिशी-मुख्यमंत्री**

आमआदमीपार्टीति दलनेत्री आतिशी अद्य दिल्ल्याः मुख्यमन्त्रीपदभारं स्वीकृतवती। दिल्ल्याः उपराज्यपालेन वी.के. सक्सेना इत्यमुना विगतसप्ताहे आतिशी-इत्यस्यै मन्त्रिपरिषदे च पदगोपनीयतायाः शपथवचनं प्रदत्तम्। ध्येयं वर्तते यत् आतिशी दिल्ल्याः कालकाजी विधानसभा-क्षेत्रात् सुषमास्वराज-इत्येतस्याः कांग्रेसदलस्य च शीला-दीक्षित इत्यस्याः अनन्तरं दिल्ल्याः तृतीया महिला मुख्यमन्त्रित्वेन नियुक्तास्ति।

**लापतालेडिज इति -ऑस्करपुरस्कारः**

चलचित्रनिर्मात्र्या: किरणराव-इत्यस्या: हास्यचलच्चित्रं लापतालेडिज इति सर्वोत्तम-वैदेशिक-चलच्चित्र वर्गे पञ्चविंशत्यधिकद्विसहस्रतमाय ऑस्करपुरस्काराय भारतस्य आधिकारिक-प्रविष्टित्वेन चितम्। भारतीय-चलचित्र-महासङ्घेन पुष्टिकृता यत् निर्देशकस्य जाहनू-बरूआ इत्यस्य नेतृत्वे त्रयोदश सदस्ययुतया समित्या आमिरखान-किरण-राव-इत्युभाभ्यां निर्मितस्य चलच्चित्रस्य चयनप्रक्रियायां ऐक्यमतेन निर्णय: अयं गृहीत:। लापतालेडिज इत्यस्मिन् निर्मिते निर्याणक मण्डलस्य प्रशस्त्रिपत्रे लिखितं यत् चलच्चित्रमिदं भारतीयमहिलानां वैविध्यपूर्णसकारत्मकीं मानसिकतां प्रदर्शयति। यत् अधीनता-प्रभुत्वयो: विभिन्नं मिश्रणं प्रकटयति इति।

**हाइकादिवससमारोहः**

हाइकायुद्धस्य वीरभटेभ्य: श्रद्धाञ्जलि: दिल्ल्यां समर्पिता। भारते इजराइलदेशीय: राजदूत: रूवेन-अजार: उभयो: देशयो: सम्बन्धान् प्रशंसितवान्। अनेन कथितं यत् कथम् उभौ देशौ सार्वभौमित्वं दूरीकृतवन्तौ लोकतन्त्रस्य च स्थापनां कृतवन्तौ। अवधेयं वर्तते यत् अष्टादश◌ाधिक नवदशसहस्रतमे वर्षे प्रथमे विश्वयुद्धे आङ्ग्ल-भारतीय-सेनाया:भाग स्वरूपा: भारतीयसैनिका: हाइकायुद्धे भागं गृहीतवन्त:। भारतीयसैनिकेभ्य: च निर्णायको विजय: आसीत् इति।

**ऋतुविज्ञानविभागः**

भारतर्तुविज्ञानविभागेन आगामिषु त्रिषु दिवसेषु कर्णाटक-महाराष्ट्र-गोवा-राज्येभ्य: अतिवृष्टि-सञ्चेतना प्रख्यापितास्ति। अपि च आगामिषु चतुर्षु दिवसेषु मध्य-पूर्व-पूर्वोत्तरीयभागेषु अतिवृष्टिपरा सञ्चेतना अनुमानिता। अनेन विभागेन केरल-गुजरात-गोवा-मध्य-महाराष्ट्र-तटीयान्ध्रप्रदेश-रायलसीमा-तेलङ्गाना-कर्णाटकेषु श्व: यावत् महती वृष्टि: प्रकल्पिता।

**लेबनानः-इज्रलः**

अद्य प्रातः लेबनाने जातेषु इजरायलदेशेन प्रहारेषु न्यूनातिन्यूनं शतं जनाः मारिताः चतुश्शततः अधिकाः जनाश्च व्रणिताः अभवन्। इतः पूर्वं इजरैल-सेनया प्रोक्तं यत् तेन अद्य सम्पूर्णे लेबनानक्षेत्रे त्रिशततः अधिकेषु क्षेत्रेषु प्रहारः विहितः अस्ति । सैन्यसमूहेन एकस्मिन् वक्तव्ये प्रोक्तं यत् अपरत्र, हिज़्बुल्लाह इत्यनेन इज्रैलस्य उत्तरक्षेत्रेषु प्रक्षेपास्त्राणि प्रक्षेपितानि सन्ति ।

**॥ इति वार्ताः॥**